# Shri Harimahima Ashtakam

# શ્રીહરિમહિમાષ્ટકમ્

## Document Information

Text title : Shri Harimahima Ashtakam

File name : harimahimAShTakam.itx

Category : vishhnu, svAminArAyaNa, krishna, aShTaka

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીહરિમહિમાષ્ટકમ્

(ઇન્દ્રવજ્રા-ઉપજાતિ વૃત્તમ્)
શ્રીધર્મ-સદ્મન્યવતીર્ય વિષ્ણુ-
ર્યો વાસુદેવો હરિકૃષ્ણ ઈશઃ ।
શ્રીનીલકણ્ઠોऽત્ર પુનાતિ મર્ત્યાન્
ધ્યાયે હરિં તં હૃદિ ધર્મપુત્રમ્ ॥ ૧॥

યસ્ય સ્વરૂપે તિલ-લક્ષ્મણાનિ
સ્વભક્તચેતાંસિ હરન્તિ યદ્વત્ ।
અયાંસિ ચાકર્ષમણિ-પ્રવેકા
ધ્યાયે હરિં તં હૃદિ ધર્મપુત્રમ્ ॥ ૨॥

યસ્યાક્ષરે ધામનિ યત્પ્રસક્તાઃ
ક્રીડન્તિ દિવ્યેऽક્ષર-સંજ્ઞમુક્તાઃ ।
સમ્રાટ્ તનૂજા ઇવ સર્વમાન્યા
ધ્યાયે હરિં તં હૃદિ ધર્મપુત્રમ્ ॥ ૩॥

યસ્યાસ્યપદ્મેऽદ્ભુતભૂરિ શોભે
વસન્તિ નેત્રભ્રમરા જનાનામ્ ।
હંસા યથા માનસ-પદ્મવૃન્દે
ધ્યાયે હરિં તં હૃદિ ધર્મપુત્રમ્ ॥ ૪॥

યઃ પોષયત્યત્ર નિજાન્ સ્વકીય-
જ્ઞાનોપદેશેન સુધોપમેન ।
વત્સાન્ સુશીલા પયસા યથા ગૌર્
ધ્યાયે હરિં તં હૃદિ ધર્મપુત્રમ્ ॥ ૫॥

પાખણ્ડધર્મા હ્યુદયેન યસ્ય
શાક્તા વ્યલીયન્ત યથોદિતેऽર્કે ।
ઘૂકા વૃષદ્વેષિણ એવ ચાન્યે

ધ્યાયે હરિં તં હૃદિ ધર્મપુત્રમ્ ॥ ૬॥

યત્પાદ-પદ્મેઽક્ષરમુક્ત-ચેતો
ભૃઙ્ગા રમન્તે સરસીવ મીનાઃ ।
આસેવ્યમાને ભુવિ ભૂરિભક્તૈર્
ધ્યાયે હરિં તં હૃદિ ધર્મપુત્રમ્ ॥ ૭॥

યદીય-સૌન્દર્ય-ગુણાદિપારં
શેષાદયો યાન્તિ ન યસ્ય ભક્તાઃ ।
વાઞ્છન્તિ નાપ્યક્ષર-સૌખ્યમન્તર્
ધ્યાયે હરિં તં હૃદિ ધર્મપુત્રમ્ ॥ ૮॥

ઇતિ શ્રીગોપાળાનન્દસ્વામિવિરચિતં શ્રીહરિમહિમાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Harimahima Ashtakam*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*